# Shri Mallari Kavacham

# શ્રીમલ્લારિકવચમ્

## Document Information

Text title : mallAri mallhArI kavacham

File name : mallArIkavacham.itx

Category : shiva, kavacha

Location : doc_shiva

Proofread by : PSA Easwaran

Latest update : August 20, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીમલ્લારિકવચમ્

મલ્હારિકવચમ્
શ્રીગણેશાય નમઃ ।
અસ્ય શ્રીમલ્લારિકવચમન્ત્રસ્ય સ્કન્દઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીમલ્લારિદેવતા ।
શ્રીમલ્લારિકવચજપે વિનિયોગઃ ॥

અથ ધ્યાનમ્ ।
ધ્યાયેન્મલ્લારિદેવં કનકગિરીનિભં મ્હાલસાભૂષિતાઙ્ગં
શ્વેતાશ્વં ખડ્ગહસ્તં વિબુધબુધગણૈસ્સેવ્યમાનં કૃતાર્થૈ ।
યુક્તાઙ્ઘ્રિ દૈત્યમૂર્ધ્ની ડમરુવિલસિતં નૈશચૂર્ણાભિરામં
નિત્યંભક્તેષુ તુષ્ટં શ્વગણપરિવૃતં નિત્યમોંકારરૂપમ્ ॥

અથ કવચમ્ ।
સનત્કુમાર ઉવાચ ।
મુનીનાં સપ્તકોટીનાં વરદં ભક્તવત્સલમ્ ।
દુષ્ટમર્દનદેવેશં વન્દેઽહં મ્હાલસાપતિમ્ ॥ ૧॥

અનુગ્રહાય દેવાનાં મણિરત્નગિરી સ્થિતમ્ ।
પ્રસન્નવદનં નિત્યં વન્દેઽહં મલ્લવૈરિણમ્ ॥ ૨॥

સર્વદેવમયં શાન્તં કૌમારં કરુણાકરમ્ ।
આદિરુદ્રં મહારુદ્રં વન્દેઽહં સાત્વિકપ્રિયમ્ ॥ ૩॥

ભુક્તિમુક્તિપ્રદં દેવં સર્વાભરણભૂષિતમ્ ।
કોટિસૂર્યપ્રતીકાશં વન્દેઽહમસુરાન્તકમ્ ॥ ૪॥

આદિદેવં મહાદેવં મલ્લારિપરમેશ્વરમ્ ।
વીરસત્ત્વં વિરૂપાક્ષં વન્દેઽહં ભક્તવત્સલમ્ ॥ ૫॥

ભોગરૂપપરંજ્યોતિઃ શિરોમાલાવિભૂષિતમ્ ।

ત્રિશૂલાદિધરં દેવં વન્દેઽહં લોકરક્ષકમ્ ॥ ૬॥

ઇદં પઠતિ યો ભક્ત્યા મલ્લારિપ્રીતિકારકમ્ ।
ભક્તાનાં વરદં નિત્યં પ્રણતોઽસ્મિ મહેશ્વરમ્ ॥ ૭॥

ફલશ્રુતિઃ -
વને રણે મહાદુર્ગે રાજચોરભયોઽપ્લુતે ।
શાકિનીડાકિનીભૂતપિશાચોરગરાક્ષસાઃ ।
ગ્રહપીડાસુ રોગેષુ વિષસર્પભયેષુ ચ ॥ ૮॥

સદા મલ્લારિમલ્લારિમલ્લારિરિતિ કીર્તનમ્ ।
સપ્તજન્મકૃતં પાપં તત્ક્ષણાદેવ નશ્યતિ ॥ ૯॥

ત્રિકાલે તુ પઠેન્નિત્યં વિષ્ણુલોકં સ ગચ્છતી ।
દેહાન્તે તુ તં પ્રાપ્નોતી સર્વલોકે મહીયતે ॥ ૧૦॥

ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે ક્ષેત્રખણ્ડે મલ્લારિમાહાત્મ્યે
શ્રીમલ્હારિકવચં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Mallari Kavacham*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*